# Shri Shiva Karpurastotram

# श्रीशिवकर्पूरस्तोत्रम्

## Document Information

Text title : Shiva Karpura Stotram

File name : shivakarpUrastotram.itx

Category : shiva, AratI

Location : doc_shiva

Proofread by : Mohan Chettoor

Latest update : January 9, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 9, 2023

*sanskritdocuments.org*

# श्रीशिवकर्पूरस्तोत्रम्

कर्पूरस्याद्यवर्णं तदनु गिरिपते पर्दिने ह्यद्युतस्ते ।
मन्त्रः साक्षात् पडरर्णो भवति शुभकरः शत्रुविध्वंसकारी ।
एतन्मन्त्रं सदा यो जपति निजगुरोः पादपद्मं स्मरन् सन्
पूज्यो भूत्वा सदैव प्रभवति स नरः श्रीयमोऽन्यो रिपूणाम् ॥ १॥

भोः शम्भो सौष्मकान्ते वकरमसहिताकारयुक्ताम्बुतीक्ष्णैः
पञ्चार्णो मन्त्रराजो भवति शुभकरो मुक्तिदः शैवरूपः ।
तारान्ते ये जपन्तो-ह तवमनुवरं शुद्धभावैः प्रशान्ताः
ते ते सिद्धिं लभन्ते शिवरसमुदिता मुक्तरूपा मुनीन्द्राः ॥ २॥

श्रीमत्मासादयुग्मं कृतपुटितमहापञ्चतारैमहेश
त्वन्मन्त्रं शाम्भवाख्यं स्मरति यदि जनोवारमेकं जितात्मा ।
भूत्वा पृथ्व्यां स लक्ष्मी-पतिरपि च महाकालकालः कवीन्द्रः
पश्चान्निर्वाण मुक्तिं सुरनुतलभते पुण्यपापैर्विमुक्तः ॥ ३॥

शम्भो त्वां श्रीमहापाशुपतमनुवरं संस्मरन् बाणलिङ्गे
सद्योजातादिवक्त्रार्चनमपि ललितापूजनं भालदेशे ।
कुर्वञ्छ्रीयन्त्रपूजां १ममममहिलाभिर्नरो ब्रह्मरन्ध्रे
साक्षाद्योगीन्द्ररूपः प्रभवति शिवतां याति सत्यं पृथिव्याम् ॥ ४॥

यस्त्वां ब्राह्म मुहुर्ते यजति सह सदा क्षीररुद्राभिषेकैः
सद्यः सन्तोष्यदेवं ग्रहभयहरणं जायते तस्य शर्व ।
तैलाख्यैः शत्रुनाशं स्मरहरदुरितध्वंशनं गोपयोभिः
निर्वाणो मोक्षरूपः प्रभवति कुलजः २कौलरुद्राभिषेकैः ॥ ५॥

शिवं त्वां पञ्चास्यं त्रिनयनयुतं शुद्धधवलं
चतुर्हस्तोपेतं सुपरशुमृगाभीतिवरदम् ।
सदानन्दं व्याघ्राम्बरपरिदधानं स्मरहर
स्मरन्ति श्रीशैवास्त्रिवसुदलपीठोपरिगतम् ॥ ६॥

प्रदोषे भक्तोयो यजति तव पादाम्बुजयुगं
    सुपत्रैर्विल्वैर्वा कुशुमसलिलैर्वा त्रिषवणम् ।
प्रशान्तो दिव्यो वार्चयति शिवरात्रौ पशुपते
    स एव ब्रह्मात्मा स हि भुवनसौख्यञ्चलभते ॥ ७॥

निशायां श्रीचक्रं यजति शिवलिङ्गोपरिसदा
    तथा विन्दौ शैवं त्रिपुरहर निर्वाणपरमम् ।
कुलद्रव्यैश्चाहङकृतिमयवलिं यः प्रकुरुते
    परो दिव्यः कौलो ब्रजति शिवतां भोः पशुपते ॥ ८॥

व्रती मूलाधारोपरि रसदलं दिग्दलमथो
    परं हृत्पत्राख्यं परशिव महाषोडशदलम् ।
त्रिवेण्यां हक्षाभ द्विदलकमलं ब्रह्ममदनं
    हठाभ्यां संयोगदलसति सुषुम्णाख्यपथतः ॥ ९॥

सहस्रारेदीपाकृतिपरमलिङ्गं परशिवं
    सदा ध्यायन दिव्यं समरसयुतं हंसगपरम् ।
परान्तस्थं शुद्धं जपतियदिमन्त्रं कुलजन-
    स्तदा जीवन्मुक्तः परमपदलीनः प्रभवति ॥ १०॥

इदं स्तोत्रं सूक्ष्मं मनुवरसमुद्धारणजप-
स्वरूपाख्यम्पूजा-परमशुभयोगादिसहितम् ॥

मया भक्त्या शम्भो तव परशिवाख्यं विरचितं
प्रसादार्थीतेऽहङ्गिरिश धनशंशेरमनुजः ॥ ११॥

(टिप्पणी

१ मननम् । मन्त्रः । मौनम् । मनः । (योग) मुद्रा ।
    एवं पञ्चमकाराः एव ममममममहिलाः ।
२ मूलाधारगतस्वयम्भूलिङ्गपरि कुलाकुलक्रमेण
    निसृतामृतधाराभिषेकानि एव कौलरुद्राभिषेकानीत्युच्यते ।)

इति श्रीधनशंशेर जङ्गवर्म्मणाविरचितं वीरेन्द्रकेसरिन्
शर्म्मणा संशोधितं श्रीशिवकर्पूरस्तोत्रम् ॥

Proofread by Mohan Chettoor

*Shri Shiva Karpurastotram*

pdf was typeset on January 9, 2023

Please send corrections to *sanskrit@cheerful.com*